श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

श्री मेल्पत्तूर् नारायणभट्टतिरि विरचितम्

# ॥ श्रीमन्नारायणीयम् ॥

## दशक - ५९

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the Wikner font.

श्रीः

श्रीमते कृष्णाय परब्रह्मणे नमः

श्रीमते रामानुजाय नमः

# ॥ श्रीमन्नारायणीयम् ॥

## दशक - ५९

*वेणुगानवर्णनम्*

त्वद्वपुर्नवकळायकोमळं प्रेमदोहनमशेषमोहनम्।
ब्रह्म तत्त्वपरचिन्मुदात्मकं वीक्ष्य सम्मुमुहुरन्वहं स्त्रियः॥ १ ॥

मन्मथोन्मथितमानसाः क्रमात्त्वद्विलोकनरतास्ततस्ततः।
गोपिकास्तव न सेहिरे हरे काननोपगतिमप्यहर्मुखे॥ २ ॥

निर्गते भवति दत्तदृष्टयस्त्वद्गतेन मनसा मृगेक्षणाः।
वेणुनादमुपकर्ण्य दूरतस्त्वद्विलासकथयाऽभिरेमिरे॥ ३ ॥

काननान्तमितवान् भवानपि स्निग्धपादपतले मनोरमे।
व्यत्ययाकलितपादमास्थितः प्रत्यपूरयत वेणुनाळिकाम्॥ ४ ॥

मारबाणधुतखेचरीकुलं निर्विकारपशुपक्षिमण्डलम्।
द्रावणं च दृषदामपि प्रभो तावकं व्यजनि वेणुकूजितम्॥ ५ ॥

वेणुरन्ध्रतरळाङ्गुलीदळं ताळसञ्चलितपादपल्लवम्।
तत् स्थितं तव परोक्षमप्यहो संविचिन्त्य मुमुहुर्व्रजाङ्गनाः॥ ६ ॥

निर्विशङ्कभवदङ्गदर्शिनीः खेचरीः खगमृगान् पशूनपि।
त्वत्पदप्रणयि काननं च ताः धन्यधन्यमिति नन्वमानयन्॥ ७ ॥

आपिबेयमधरामृतं कदा वेणुमुक्तरसशेषमेकदा।
दूरतो बत कृतं दुराशयेत्याकुला मुहुरिमाः समामुहन्॥ ८ ॥

प्रत्यहं च पुनरित्थमङ्गनाश्चित्तयोनिजनितादनुग्रहात्।
बद्धरागविवशास्त्वयि प्रभो नित्यमापुरिह कृत्यमूढताम्॥ ९ ॥

रागस्तावज्जायते हि स्वभावान्मोक्षोपायो यत्नतः स्यान्न वा स्यात्।
तासां त्वेकं तद्द्वयं लब्धमासीत् भाग्यं भाग्यं पाहि मां मारुतेश॥ १० ॥

**********